# Summative Assessment-I (2014-15)

Class - VIII

Sub. - **Sanskrit**

Time - 2½ hrs. M.M. - 90

*निर्देशः*– (i) अस्मिन् प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

(ii) सर्वेषां प्रश्नानाम् उत्तराणि क्रमानुसारं दीयताम्।

## खण्ड – 'क' (अपठित अवबोधनम्) (10)

**प्रश्न–1. अधोलिखितान् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत्–** **(10)**

दीपावली प्राचीनतमं पर्व। अस्मिन् दिने सर्वाधिकं आकर्षकं मनोरञ्जनं भवति। स्फोटकानाम् आस्फोटनम् विचित्राणि वर्णयुक्तानि स्फोटकानि आकाशे भूमौ च विविधरुपाणि दर्शयन्ति। जनाः तानि दृष्ट्वा तुष्यन्ति। परन्तु अति सर्वत्र वर्जयेत्। रात्रौ आस्फोटकानां शब्दः कर्णौ बधिरीकरोति वायुमण्डलं च दूषयति। पूर्वं तु जनसंख्या सीमिता आसीत्। वृक्षाः वायुं शुद्धं कुर्वन्ति स्म। इदानीम् जनसंख्या प्रवृद्धा, वृक्षसंख्या च क्षीणा। विस्फोटकेभ्यः निर्गतः धूमः रुग्णान् पीडयति, नवजातशिशुभ्यः हानिकरः सिध्यति। दीपावलि–समये शरदि आकाशः निर्मलः भवति। सर्वत्र पवित्रता विराजते। अतः वयम् आनन्देन दीपावलिं मानयेम, वसुन्धरां भूषितां कुर्याम न तु दूषिताम्।

**(i) एकपदेन उत्तरत।** **(½ × 4 = 2)**

(क) केषाम् आस्फोटनं सर्वेभ्यः आकर्षकं मनोरञ्जकम् च?

(ख) दीपावलिः कस्मिन् ऋतौ भवति?

(ग) के वायुं शुद्धं कुर्वन्ति?

(घ) सर्वत्र का विराजते?

**(ii) पूर्णवाक्येन उत्तरत।** **(1 × 2 = 2)**

(क) स्फोटकानां धूमः कान् पीडयति?

(ख) दीपावलि समये आकाशः कीदृशः भवति?

**(iii) भाषिक कार्यम्।** **(1 × 4 = 4)**

(क) 'प्रवृद्धा' इति पदस्य अत्र किं विलोमपदं गद्यांशे प्रयुक्तम्?

(अ) दुर्बला (ब) क्षीणा (स) सीमिता (द) वसुन्धरा

(ख) 'निर्मलः' इति पदस्य पर्यायपदं किम्?

(अ) स्वच्छः (ब) सर्वत्र (स) क्षीणः (द) पवित्रता

(ग) 'सर्वत्र पवित्रता विराजते' अत्र किं अव्ययपदम्?

(अ) पवित्र (ब) पवित्रता (स) विराजते (द) सर्वत्र

(घ) 'प्राचीनतमं पर्व' अत्र विशेष्यपदं किम्?

(अ) प्राचीन (ब) तमं (स) पर्वः (द) प्राचीनतमं

**(iv)** अस्य गद्यांशस्य उचितं शीषर्कं लिखत। **(2)**

## खण्ड – 'ख' (रचनात्मक कार्यम्) (15)

**प्रश्न–2. स्व–विद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति लिखितम् इदम् अपूर्णं पत्र मञ्जूषातः पदानि विचित्य पूरयत।** **(½ × 10 = 5)**

**मञ्जूषाः–** सुहद्, लेखिष्यामि, प्रशंसनीया, विकास, परिश्रमिणः, नमस्कारः, वर्णनं, शोभनः, कुशलोऽस्मि, अध्यापकाः

रामनगरम्

कुरुक्षेत्रम्।

तिथि : 26.09.2014

प्रिय (i) __________,

सप्रेम (ii) __________।

अहम् अत्र (iii) __________। अहम् अधुना स्वविद्यालयस्य (iv) __________ कर्तुम् इच्छामि। मम विद्यालयः अतीव विशालः (v) __________ वातानुकूलितः च अस्ति। अस्माकं सर्वे (vi) __________ मनोयोगेन पाठयन्ति। तेषां योग्यता वस्तुतः (vii) __________। मम विद्यालये सर्वे छात्राः अपि (viii) __________ सन्ति। विस्तरेण पुनः (ix) __________।

मातापितृचरणयोः प्रणामाः।

भवतः (x) __________,

गोपालः

**प्रश्न–3. अधोलिखितान् संवादान् मञ्जूषायां प्रदत्तशब्दैः पूरयन्तु।** **(1 × 5 = 5)**

**मञ्जूषाः** (पुरस्कारम्, वार्षिकोत्सवः, आगच्छामि, गमिष्यामि, भविष्यन्ति)

राधिका– अयि विशाखे ! अद्य मम विद्यालये (i) __________ अस्ति।

विशाखा– अहम् स्वपित्रां सह विद्यालयं (ii) __________।

विशाखा – राधिके! किं तत्र तव मित्राणि अपि (iii) __________।

राधिका – आम्। तत्र अहं (iv) __________ अपि लप्स्ये।

विशाखा – अति शोभनम्, प्रतीक्षस्व तावत्। सज्जीभूय अहम् अपि (v) __________।

**प्रश्न–4. निम्नलिखित में से किसी एक शीर्षक पर निबन्ध लिखिए (5 वाक्य) :–** **(1 × 5 = 5)**

अस्माकं विद्यालयः, वसन्त ऋतुः, विद्यायाः महत्वम्

**खण्ड – 'ग' (अनुप्रयुक्त व्याकरण)** **(30)**

**प्रश्न–5. अधोलिखितेषु वाक्येषु रेखांङ्कित पदेषु सन्धिम् वा कुरुत।** **(1 × 4 = 4)**

**(i)** <u>रमेशः</u> विद्यालयं गच्छति। ______ + ______

**(ii)** सः <u>सदा+एव</u> सत्यं वदति। ______________

**(iii)** <u>हिमालयः</u> अस्माकं देशस्य प्रहरी अस्ति। ______ + ______

**(iv)** <u>परोपकारः</u> एकः सद्गुणः अस्ति। ______ + ______

**प्रश्न–6. उचित शब्दरुपैः अधोलिखितानि रिक्तस्थानानि पूरयन्तु–** **(1 × 4 = 4)**

| | | |
|---|---|---|
| बालकः | __________ | बालकाः |
| __________ | मुनी | मुनीन |
| फलम् | फले | __________ |
| त्वम् | __________ | यूयम् |

**प्रश्न–7. उचित धातुरुपैः अधोलिखितानि रिक्तस्थानानि पूरयन्तु–** **(1 × 4 = 4)**

| | | |
|---|---|---|
| भवतु | __________ | भवन्तु |
| पश्यामि | पश्यावः | __________ |
| __________ | करिष्यतः | करिष्यन्ति |
| वदेत् | वदेताम् | __________ |

**प्रश्न–8. संख्यावाचक शब्दाः लिखत–** **(1 × 4 = 4)**

12, 25, 42, 50

**प्रश्न–9. अधोलिखितेषु समस्तपदेषु विग्रहं कुरुत–** **(1 × 4 = 4)**

1– विद्यालयः 2– राजपुत्रः 3– त्रिलोकी 4– कृष्णसर्पः

**प्रश्न–10. प्रकृति–प्रत्ययान् योजयित्वा पदनिर्माणं कुरुत।** **(1 × 4 = 4)**

**(i)** पठ् + क्त्वा =　　**(ii)** हस् + क्त =

**(iii)** अनुशासनम् =　　**(iv)** लिख् + क्त्वा =

**प्रश्न–11. अधोलिखितेषु उपसर्गक्रियापदेषु उपसर्गं क्रियापदं च पृथक् कुरुत।** **(1 × 3 = 3)**

**(i)** प्राचलत = ______ + ______　　**(ii)** सम्भवति = ______ + ______

**(iii)** अनुशासनम् = ______ + ______

**प्रश्न–12.** णिजन्त तथा प्रेरणार्थक क्रियायें किसे कहते हैं ? उदाहरण सहित स्पष्ट करो। **(3)**

**खण्ड – 'घ' (पठित अवबोधनम्)** **(35)**

**प्रश्न–13. हिन्दी भाषायाम् अनुवादम् लिखत।** **(4)**

द्वौ अश्वौ द्वौ च अश्वारोहिणौ। एकः बालकः एका च बालिका। बालिकायाः अश्वः तीव्रतरं धावति। अकस्मात् बालकः धावतः अश्वात् पतन्नस्ति। बालिका त्वरितं तम् उत्थापयति, निजाश्वे उपवेशयति गृहं च प्रत्यावर्तते। सेयम् आसीत् वीरबालिका 'मनुः'। मोरोपन्तताम्बे महोदयस्य कन्या। पश्चात् सैव झाँसीराज्ञी वीराङ्गना लक्ष्मीबाई इति नाम्ना प्रसिद्धा अभवत्।

**प्रश्न–14. हिन्दी भाषायाम् श्लोकस्य अर्थं लिखत।** **(4)**

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।

**प्रश्न–15. अधोलिखितानां शब्दार्थाः लिखत।** (कोई चार) **(1 × 4 = 4)**

वृष्टिः, स्वर्णमयी, प्रचण्डा, वीराङ्गना, भिक्षुकः, नागदन्ते

**प्रश्न–16. निर्देशानुसार वाक्यानि लकारे परिवर्तनम् कुरु।** **(1 × 4 = 4)**

**(क)** अहं दूरदर्शनं पश्यामि। (लृट् लकार)

**(ख)** बालाः दुग्धं पिबन्ति। (लोट् लकार)

**(ग)** त्वं मन्दिरं गच्छ। (लट् लकार)

**(घ)** सा फलम् न अखादत्। (विधिलिंड़ लकार)

**प्रश्न–17. वाक्यानि शुद्धं कुरुत।** **(1 × 4 = 4)**

**(क)** <u>रविं</u> नमः।

**(ख)** ते <u>सूर्याय</u> नमन्ति।

**(ग)** पृथिवीं द्वे गती स्तः।

**(घ)** एतस्य <u>जलचक्रात्</u> कारणं किम् ?

**प्रश्न–18. अधोलिखितानि प्रश्नानि उत्तरत–** (कोई चार) **(1 × 4 = 4)**

**(क)** पुरुषस्य अधिकारः कुत्र अस्ति ?

**(ख)** डॉ० राजेन्द्रप्रसादस्य जन्म कस्मिनं प्रान्ते अभवत् ?

**(ग)** आरुणेः कुरुः कः आसीत् ?

**(घ)** देवभूमिः का अस्ति ?

**(ङ)** कः पूर्वदिशायाम् उदेति ?

**(च)** कः ज्ञानं लभते ?

प्रश्न–19. रिक्तस्थानानि पूर्तिं कुरुत। (1 × 4 = 4)

(क) भिक्षुकः अतीव ________ आसीत्। (पण्डितः, दानी, कृपणः)

(ख) पादेन ________ पत्नीं ताऽयिष्यामि। (शिक्षितां, अबाध्यां, सुशीलां)

(ग) ________ सुखं दुःखाय एव भवति। (आत्मवंश, विद्यार्जितं, कल्पितं)

(घ) भिक्षुकः ________ घटमेव पादेन अताऽयत्। (जलपूरितं, चूर्णपूरितं, ताण्डुलपूरितं)

**प्रश्न–20. सही कथनों पर '✔' चिह्न लगाएँ।** **(1 × 4 = 4)**

(क) राज्ञः मनसि त्रय प्रश्नाः आगताः।

(ख) प्रश्नान् श्रुत्वा संन्यासी त्वरितं उत्तरं दत्तवान्।

(ग) उद्यानकार्ये राजा सन्यासिनः सहायतां कृतवान्।

(घ) पीडितः जनः राज्ञः अङ्गरक्षकः आसीत्।

**प्रश्न–21. संस्कृत भाषायाम् अनुवादं कुरुत–** **(1 × 3 = 3)**

(क) नीरोग व्यक्ति सुखी होते हैं।

(ख) पानी से भरे घड़े को ले आओ।

(ग) हर रोज व्यायाम करना चाहिए।